# ॥ रामकथाकथनम् ॥

विलोक्य हनुमान् किञ्चिद् विचार्यैतदभाषत।
शनैः शनैः सूक्ष्मरूपो जानक्याः श्रोत्रगं वचः ॥ १२ ॥

इक्ष्वाकुवंशसम्भूतो राजा दशरथो महान्।
अयोध्याधिपतिस्तस्य चत्वारो लोकविश्रुताः ॥ १३ ॥

पुत्रा देवसमाः सर्वे लक्षणैरुपलक्षिताः।
रामश्च लक्ष्मणश्चैव भरतश्चैव शत्रुहा ॥ १४ ॥

ज्येष्ठो रामः पितुर्वाक्याद् दण्डकारण्यमागतः।
लक्ष्मणेन सह भ्रात्रा सीतया भार्यया सह ॥ १५ ॥

उवास गौतमीतीरे पञ्चवट्यां महामनाः।
तत्र नीता महाभागा सीता जनकनन्दिनी ॥ १६ ॥

रहिते रामचन्द्रेण रावणेन दुरात्मना।
ततो रामोऽतिदुःखार्तो मार्गमाणोऽथ जानकीम् ॥ १७ ॥

जटायुषं पक्षिराजमपश्यत् पतितं भुवि।
तस्मै दत्त्वा दिवं शीघ्रमृष्यमूकमुपागमत् ॥ १८ ॥

सुग्रीवेण कृता मैत्री रामस्य विदितात्मनः।
तद्भार्याहारिणं हत्वा वालिनं रघुनन्दनः ॥ १९ ॥

राज्येऽभिषिच्य सुग्रीवं मित्रकार्यं चकार सः।
सुग्रीवस्तु समानाय्य वानरान् वानरप्रभुः ॥ २० ॥

प्रेषयामास परितो वानरान् परिमार्गणे।
सीतायास्तत्र चैकोऽहं सुग्रीवसचिवो हरिः ॥ २१ ॥

सम्पातिवचनाच्छीघ्रमुल्लङ्घ्य शतयोजनम्।
समुद्रं नगरीं लङ्कां विचिन्वन् जानकीं शुभाम् ॥ २२ ॥

शनैरशोकवनिकां विचिन्वन् शिंशपातरुम्।
अद्राक्षं जानकीमत्र शोचन्तीं दुःखसम्प्लुताम् ॥ २३ ॥

रामस्य महिषीं देवीं कृतकृत्योऽहमागतः।
इत्युक्त्वोपररामाथ मारुतिर्बुद्धिमत्तरः ॥ २४ ॥

॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुन्दरकाण्डे तृतीये सर्गे हनूमता रामकथाकथनं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ramakatha_Kathanam.

generated on **March 29, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits